॥ श्रीः ॥

# ॥ श्रीकालभैरवाष्टकम् ॥

अङ्गसुन्दरत्वनिन्दिताङ्गजातवैभवं
भृङ्गसर्वगर्वहारिदेहकान्तिशोभितम् ।
मङ्गलौघदानदक्षपादपद्मसंस्मृतीं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ १

पादनम्रमूकलोकवाक्प्रदानदीक्षितं
वेदवेद्यमीशमोदवार्धिशुभ्रदीधितिम् ।
आदरेण देवताभिरर्चिताङ्घ्रिपङ्कजं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ २

अम्बुजाक्षमिन्दुवक्त्रमिन्दिरेशनायकं
कम्बुकण्ठमिष्टदानधूतकल्पपादपम् ।
अम्बरादिभूतरूपमम्बरायिताम्बरं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ३

मन्दभाग्यमप्यरं सुरेन्द्रतुल्यवैभवं
सुन्दरं च कामतोऽपि संविधाय सन्ततम् ।
पालयन्तमात्मजातमादरात्पिता यथा
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ४

नम्रकष्टनाशदक्षमष्टसिद्धिदायकं
कम्रहासशोभितुण्डमच्छगण्डदर्पणम् ।
कुन्दपुष्पमानचोरदन्तकान्तिभासुरं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ५

काशिकादिदिव्यदेशवासलोलमानसं
पाशिवायुकिन्नरेशमुख्यदिग्धवार्चितम् ।
नाशिताघबृन्दमङ्घ्रिनम्रलोकयोगदं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ६

सारमागमस्य तुङ्गसारमेयवाहनं
दारितान्तरान्ध्यमाशु नैजमन्त्रजापिनाम् ।
पूरिताखिलेष्टमष्टमूर्तिदेहसम्भवं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ७

कालभीतिवारणं कपालपाणिशोभितं
खण्डितामरारिमिन्दुबालशोभिमस्तकम् ।
चण्डबुद्धिदानदक्षमक्षतात्मशासनं
शृङ्गशैलवासिनं नमामि कालभैरवम् ॥ ८

इति श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीमहास्वामिविरचितं
श्रीकालभैरवाष्टकं सम्पूर्णम् ॥

